भात इत्। गुणः।) त्याज्यः। यथा,—
"ऊषरा वालुकाक्लिन्ना" इत्यादुपक्रम्य।
"वास्तुखण्डे महादोषा हेयास्तस्माद्विचक्षणैः॥"
इति युक्तिकल्पतरुः॥

हेरं, क्लि, (हि+रन्।) मुकुटभेदः। हरिद्रा। आसुरी माया। इति केचित्॥

हेरम्बः, पुं, (हे रणे शिवसमीपे वा रम्बते इति। रबि शब्दे+पचाद्यच्।) गणेशः। इत्यमरः।१।१।४१॥ महिषः। शौर्य्यगर्व्वितः। इति मेदिनी॥ बुद्धविशेषः। तत्पर्य्यायः। हेरुकः २ चक्रसम्बरः ३ हेवः ४ वज्रकपाली ५ निशुम्भी ६ शशिशेखरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥ * ॥ अथ हेरम्बमन्त्रः। स च ऊकारयुक्तो गकारः सबिन्दुः प्रणवादिनमोऽन्तश्चतुरक्षरः। निबन्धे।
"पञ्चान्तको बिन्दुयुक्तो वामकर्णविभूषितः।
तारादिर्हृदयान्तोऽयं हेरम्बमनुरीरितः।
चतुर्वर्णात्मको नृणां चतुर्वर्गफलप्रदः॥"
अस्य पूजाप्रयोगः। प्रातःकृत्यादिपीठन्यासान्तं विधाय गणेशोक्तपीठशक्तीः पीठमनुञ्च विन्यस्य ऋष्यादिन्यासं कुर्य्यात्। अस्य गणक ऋषिर्गायत्री छन्दो हेरम्बो देवता गकारो बीजं बिन्दुः शक्तिश्चतुर्व्वर्गसिद्ध्यर्थे विनियोगः। शिरसि गणकऋषये नमः। इत्यादि। ततः कराङ्गन्यासौ। गां गीं गूं गैं गौं गः इत्येतैः षडङ्गानि कुर्य्यात्। तथा च।
"षड्दीर्घभाजा बीजेन षडङ्गानि प्रकल्पयेत्॥"
ततो ध्यानम्।
"मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितै-
र्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम्।
दृप्तं दानमभीतिमोदकरदान् टङ्कं शिरोऽक्षात्मिकां
मालां मुद्गरमङ्कुशं त्रिशिखकं दोर्भिर्दधानं भजे॥"
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्य्यात्। ततो गणेशोक्तपीठपूजान्तं कृत्वा ॐ हुं हुं महासिंहाय गां हेरम्बासनाय नमः इत्यासनं पूजयेत्। तथा च निबन्धे।
"प्रणवं कवचद्वन्द्वं महासिंहाय गां ततः।
हेरम्बेति पदं पश्चात् आसनाय हृदन्ततः॥
अयमासनमन्त्रः स्यात् प्रदद्याद्वस्तुनासनम्॥"
इति॥
पीठन्यासोऽप्येवं मन्त्रः। तत ॐ मं मन्त्रेण मूर्त्तिं संकल्पयेत्। तथा च निबन्धे।
"तारादिविघ्नबीजेन मूर्त्तिं तस्य प्रकल्पयेत्।"
पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। यथा अग्न्यादिकोणे मध्ये दिक्षु च गां हृदयाय नम इत्यादिना पूजयेत्। तद्बहिरिन्द्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। तथा च।
"त्रिलक्षञ्च जपेन्मन्त्रं दशांशं जुहुयात्ततः।"
होमद्रव्यं यथा,
"लक्षत्रयं जपेन्मन्त्रमिक्षुदण्डैर्दशांशतः।
अपूपैराज्ययुक्तैर्व्वा जुहुयान्मन्त्रसिद्धये॥" * ॥
मन्त्रान्तरम्। गं क्षिप्रप्रसादनाय हृत्। तथा च निबन्धे।
"सम्वर्त्तको नेत्रयुतः पार्श्वो वज्रासने स्थितः।
प्रसादनाय हृन्मन्त्रं स्वबीजाद्यो दशाक्षरः॥"
अस्य पूजा प्रातःकृत्यादिपीठन्यासान्तं कर्म्म विधाय ऋष्यादिन्यासं कुर्य्यात्। शिरसि गणकऋषये नमः। मुखे विराट्छन्दसे नमः। हृदि क्षिप्रप्रसादनाय देवतायै नमः। तथा च निबन्धे।
"गणको मुनिराख्यातो विराट् छन्द उदीरितम्।
क्षिप्रप्रसादनो विघ्नो देवतास्य प्रकीर्त्तिता।
दीर्घयुक्तेन बीजेन षडङ्गानि प्रकल्पयेत्॥"
एकाक्षरवत् कराङ्गन्यासौ कृत्वा ध्यायेत्।
"पाशाङ्कुशौ कल्पलतां विषाणं
दधत्स्वशुण्डाहितबीजपूरः।
रक्तस्त्रिनेत्रस्तरुणेन्दुमौलि-
र्हारोज्ज्वलो हस्तिमुखोऽवताद्वः॥"
इति ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजामारभेत्। अग्न्यादिषु गां हृदयाय नम इत्यादिना पूजयेत्। तथा च निबन्धे।
"अङ्गानि पूर्व्वमभ्यर्च्य विघ्नानष्टौ यजेत्ततः।
पत्राग्रे पूजयेदेता ब्राह्म्याद्यास्तदनन्तरम्॥"
पत्रेषु।
"विघ्नं विनायकं शूरं वीरं वरदसंज्ञकम्।
इभवक्त्रं चैकरदं लम्बोदरं प्रपूजयेत्॥"
पत्राग्रेषु ब्राह्म्याद्यास्तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत्। ततो धूपादिविसर्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। तथा च।
"लक्षं जपेज्जपस्यान्ते जुहुयादयुतं तिलैः।
मधुरत्रितयैर्व्वापि द्रव्यैरष्टाभिरीरितैः॥"
इति कृष्णानन्दकृततन्त्रसारः॥

हेरम्बजननी, स्त्री, (हेरम्बस्य जननी।) दुर्गा। इति शब्दरत्नावली॥

हेरम्बहट्टः, पुं, देशविशेषः। स च दक्षिणप्रदेशे वर्त्तते। इति शब्दरत्नावली॥

हेरिकः, पुं, (हि+इकः। रुट् च।) चरः। इति हेमचन्द्रः॥

हेरुकः, पुं, (हि+उकः। रुट् च।) बुद्धभेदः। महाकालगणः। इति मेदिनी॥ शिवलिङ्गविशेषः। यथा,—
"शिवलिङ्गञ्च तत्रास्ति शिलायां हेरुकाह्वयम्।
नदीदक्षिणपूर्व्वस्यां नायकं तन्तु पूजयेत्॥"
इति कालिकापुराणे कामाख्याकल्पनिर्णये ८१ अध्यायः॥ गणेशः। इति तत्रैव॥

हेलञ्ची, स्त्री, (हेलं चिनोतीति। चि+डः। ङीष्। पृषोदरात् साधुः।) हिलमोचिका। हेलञ्चा इति भाषा। इति शब्दचन्द्रिका॥ (हिलमोचिकाशब्देऽस्या गुणादयो ज्ञेयाः॥

हेलनं, क्ली, (हेड़+ल्युट्। डलयोरैक्यम्।) अवहेला। इति शब्दरत्नावली॥ (यथा, भागवते।६।२।१४।
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव च।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥")

हेला, स्त्री, (हिल्+घञ्। टाप्।) स्त्रीणां शृङ्गारभावजक्रियाविशेषः। इत्यमरः।१।७।३२॥ सुरते प्रौढ़ेच्छा हेला। यदाह।
"प्रौढ़ेच्छा याति रूढ़ानां नारीणां सुरतोत्सवे।
शृङ्गारशास्त्रतत्त्वज्ञैर्हेला सा परिकीर्त्तिता॥"
इति।
अन्ये तु।
"स एव हेला सुव्यक्तः शृङ्गाररससूचकः।"
इत्याहुः। अस्यार्थः। हाव एव स्फुटशृङ्गारानुभावो हेलेति। अन्ये त्वाहुः विलासादयो दश स्वाभाविकाः भावहावहेलास्त्रयोऽङ्गजाः शोभादयः सप्त प्रयत्नजाः। इति विंशतिरलङ्काराः। तेषु।
"देहात्मकं भवेत् सत्त्वं सत्त्वाद्भावः समुत्थितः।
भावात् समुत्थितो हावो हावाद्धेला समुत्थिता॥"
इति॥
हिल श हावकृतौ घञ् स्त्रीत्वं लोकाश्रयात्। हेलिरपि।
"हेलिः पुंसि रवौ हेलिर्हेलायामपि योषिति।"
इति रुद्रः। इति भरतः॥
अपि च।
"हाव एव भवेद्धेला व्यक्तः शृङ्गारसूचकः।"
इत्युज्ज्वलनीलमणिः॥ * ॥
अवज्ञा। इति मेदिनी॥ (यथा, मार्कण्डेयपुराणे।१४।२८।
"स्वल्पं पुण्यं शुभं गन्धं हेलया सम्प्रयच्छति।
स्पर्शं वाप्यथवा शब्दं रसं रूपमथापि वा॥")
ज्योत्स्ना इति केचित्॥

हेलावुकः, पुं, अश्वविक्रयी। इति हारावली॥

हेलिः, पुं. (हिलति। हिल+"सर्व्वधातुभ्य इन्।" उणा० ४।११७। इति इन्।) सूर्य्यः। इति त्रिकाण्डशेषः॥ आलिङ्गनम्। इति केचित्॥

हेलिः, स्त्री, (हिल श हावकृतौ+इन्।) हेला। इति रुद्रः। इत्यमरटीकायां भरतः॥

हेष, ऋ ङ अश्वानां स्वने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म० अक०-सेट्।) ङ, हेषते घोटकः। जिहेषे। ऋ, अजिहेषत्। इति दुर्गादासः॥

हेषा, स्त्री, (हेष+भावे अः।) अश्वानां निस्वनः। (यथा, मार्कण्डेयपुराणे।२२।२०।
"कृतार्त्तहेषाशब्दो वै त्रस्तः साश्रुविलोचनः।
नीतः सोऽश्वश्च तेनैव दानवेन दुरात्मना॥")